E-ISSN-2584-2870 https://doi.org/10.65833/dbs.2026.324

केन्द्रीयसंस्कृतविश्वविद्यालयः
श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः
देवभूमि-सौरभम्
E-ISSN 2584-2870
Devabhūmisaurabham

Vol 3 Issue 1 Jan-June 2026 Devabhūmisaurabham International Journal of CSU Shri Raghunath Kirti Campus Devprayag Uttarakhand India

# आचार्यमण्डनमिश्रनये भावनायाः स्वरूपम्

**डॉ० श्रीनारायणपाठकः**
सहायक आचार्यः
शहीदहीरासिंहराजकीयस्नातकोत्तरमहाविद्यालयः
चन्दौली, उ०प्र०
ईमेल- shreenarayanpathak790@gmail.com
मो०नं०: 9555610979

## शोधलेखसारः

भावनाविवेकनामाऽयं ग्रन्थो धात्वर्थव्यापाराऽतिरिक्तां आख्यातत्त्वेन आख्यातसामान्यवाच्यां कृत्यपरपर्यायां भावनाम् अभिधत्ते। अस्मिन् ग्रन्थे प्रबलया सद्युक्त्या दुर्धर्षैः प्रमाणैः किल आख्यातप्रत्ययवाच्यत्त्वेन साधयितुं प्रवृतः सर्वशास्त्रोपदेष्टा आचार्यमण्डनमिश्रस्तावत् स्वरचिताऽन्यग्रन्थाऽन्तरवत् मूलकारिका, तद्व्याख्यानभूतो गद्य-पद्याऽऽत्मको ग्रन्थः प्रणीतः। अत्र ग्रन्थे द्वौ भागौ वर्तेते पूर्वपक्षाऽऽत्मकः पूर्वभागः, सिद्धाऽन्तप्रतिपादकश्च अपराऽर्द्धः अत्र वैयाकरणः पूर्वपक्षिरूपेण समुपतिष्ठते। इह वैयाकरणैः, भावनावाच्यत्त्वं धातुनिरूपितमेव न त्वाख्यातप्रत्ययवाच्यमपीति। यतो वैयाकरणेन क्रियायाः साक्षात् परम्परया वा पुरुषाऽर्थभूतं फलम् = विक्लेदनाऽऽदि यत्नसहितपाकयागाऽऽदिव्यापारश्च धातुवाच्यत्त्वेन स्वीक्रियते। अतो वैयाकरणाऽभिमतधातुवाच्या भावना प्रकृतग्रन्थस्य पूर्वाऽर्धेन पूर्वपक्षीकृत्य भाट्टसिद्धाऽन्तसिद्धाया आख्यातसामान्यवाच्याया भावनाया आख्यातप्रत्ययबोध्यत्वमिह भावनाविवेके सत्तर्काऽन्वितप्रमाणपुञ्जैरति-विस्तारेणाऽभिहितम्।।

**कुञ्चिकापदानि** – भावना, कृतिः, यत्नः, धात्वर्थः, व्यापारः, फलम्, आख्यातः, संसर्गः, धातुश्चेति।

## भूमिका -

**सिद्धाऽर्थं ज्ञातसम्बन्धं श्रोतुं श्रोता प्रवर्त्तते।**
**शास्त्राऽऽदौ तेन वक्तव्य: सम्बन्ध: सप्रयोजन:।।**
**शास्त्रं प्रयोजनं चैव सम्बन्धस्याऽऽश्रयावुभौ।**
**तदुक्त्यन्तर्गतस्तस्माद् भिन्नो नोक्त: प्रयोजनात्।।**
**सिद्धि: श्रोतृप्रवृत्तीनां सम्बन्धकथनाद्यत:।**
**तस्मात् सर्वेषु शास्त्रेषु सम्बन्ध: पूर्वमुच्यते।।**
**यावत् प्रयोजनेनाऽस्य सम्बन्धो नाऽभिधीयते।**
**असम्बद्धप्रलापित्वाद् भवेत्तावदसङ्गति:।।**[1]

अनेन ग्रन्थेनेदं प्रतिभाति यद् यावद् आरभ्यमानशास्त्रप्रतिपाद्याऽर्थस्य शास्त्रीयप्रयोजनस्य शास्त्रप्रतिपाद्याऽर्थेन सह शास्त्रसम्बन्धस्य, प्रयोजनेन च साकं शास्त्रसम्बन्धस्य निश्चयो न स्यात् तावच्छास्त्रश्रोतु: शास्त्राऽध्ययने प्रवृतिर्न जायते। अपि च शास्त्राऽऽदिप्रतिपाद्याऽर्थाऽऽदेर्ज्ञानमपि सामान्यरूपमेव, विशेषविषये यदि निर्भ्रान्ति: स्यात्तदाऽपि प्रवृत्ति: प्रतिबद्धा भवेदिति। अत एव निष्प्रयोजने काकदन्ताऽऽदिपरीक्षणाऽऽत्मके विचारे प्रामाणिकानामप्रवृत्ति:, किञ्च प्रतिपाद्यविषयस्य विशेषप्रकारको निश्चयोऽपि प्रतिपादकग्रन्थाऽध्ययने प्रतिबन्धक:। अतो प्रतिपाद्यविशेषे च सन्देहे सति प्रमातु: प्रवृत्तिर्जायते।

अर्थात् सर्वो हि सांशयिक: सप्रयोजनश्चाऽर्थो वैचारिकप्रवृत्तिगोचरो भवति नाऽन्य:, अत्राऽस्य प्राऽऽरिप्सितस्य प्रकरणग्रन्थस्य तथाविधो विषयो वक्तव्य इति प्रथमं तत्प्रतिपादयितुमाह मूलकार:

**संसर्गमोहितधियो विविक्तं धातुगोचरात्।**
**भावाऽऽत्मानं न पश्यन्ति ये तेभ्य: स विविच्यते।।**[2]

अनेनेदं रहस्यमत्रत्यमभिव्यज्यते- प्रकृतप्रकरणग्रन्थस्य भावना पदाऽर्थो विषय:, तस्या: भावनाया: सद्भावे, आख्यातप्रत्ययगम्यत्वे च विप्रतिपद्यन्ते जिज्ञासवो यन्न पदाऽर्थो नाम व्यावहारिके शास्त्रीये च धरातले विद्यते। यदि कथञ्चित् स्यात्, तथापि नेयं भावना आख्यातप्रत्ययवाच्या भवितुमर्हति, अपितु सा धातुवाच्यैव भवेत्।

---

[1] प्रतिज्ञासूत्रम् - श्लो०वा० १७.....२०

[2] द्र०- भा० वि०, का०- ०१

किं पुनर्भावनाविषयिन्या विप्रतिपत्तेः कारणम्? भावनाविषयकस्य विवेकस्य अनवधारणमेव कारणमिह गृह्यताम्।

ननु खल्वितरेभ्यो धातुशब्दवाच्येभ्यो विक्लित्यादिजनकव्यापारेभ्यः स्वतो विविक्तस्य भावनापदाऽर्थस्य कुतः विवेकाऽनवधारणम्? अर्थात् स्वतो विविक्ते वस्तुनि कुतो विवेकाऽनवधारणम्? संसर्गात् = पदाऽर्थाऽन्तरसंसर्गाद्। तथाहि- स्वतो विविक्तानामपि पदाऽर्थानां पदाऽर्थाऽन्तरसंसर्गाद् विवेकाऽनवधारणं दृश्यते, यथा- देहेन्द्रियमनोबुद्ध्यादिपदाऽर्थाऽन्तरैः सह आत्मनः संसर्गात् = तादात्म्यभ्रमाद् विवेकनिश्चयविरहो दृश्यते आत्मनो वस्तुनः, यथा वा उदात्ताऽनुदात्त-स्वरित-ह्रस्व-दीर्घ-प्लुताऽऽदिपदाऽर्थैः सह संसर्गाद् अकाराऽऽदिस्वरवर्णानां विवेकाऽनवधारणं दृश्यते, तथा प्रकृतेऽपि धात्वर्थैः पदाऽर्थाऽन्तरभूतैः संयोग-विभागाऽऽदिभिः सह भावनापदाऽर्थस्य आख्यातप्रत्ययवाच्यस्य धात्वर्थैः संयोगविभागाऽऽदिस्वरूपै र्गुणविशेषैरभेदभ्रमाद् तैर्धात्वर्थभूतैः पार्थक्येन क्रियास्वरूपस्य भावनापदाऽर्थस्य विवेकाऽनुदयो जायते, विवेकाऽनुदयाच्च विप्रतिपत्तिः = परस्परविरुद्धं ज्ञानद्वयस्य प्रादुर्भावः, अथवा परस्परविरुद्धाऽर्थकयोः वाक्ययोः प्रयोगो दृश्यते, विप्रतिपत्तिदर्शनाच्चाऽन्येषामपि जिज्ञासूनां संशयो जायते, अतः भावनाविषये भ्रान्तानां सन्दिग्धानाम्, तथा भावनाविषयकबोधविहीनानां च कृते भावना पदाऽर्थविवेचनाय प्रकरणग्रन्थस्याऽस्य प्रणयनं ग्रन्थकारेण क्रियते। अर्थाद् भावनासम्बद्धानां भ्रम-संशयाऽज्ञानानां विनिवृत्तये भावनास्वरूपाऽवधारकोऽयं ग्रन्थोऽवतार्यते।[3]

ननु किं पुनरनया भावनया विवेकेन प्रतिपादितया प्रयोजनम्? स्वर्गाऽऽदीनां साध्यत्वसिद्धिरेवप्रयोजनमिति ग्राह्यम्।

तथाहि- "यजेत स्वर्गकामः" इत्यादौ तावदाख्यातप्रत्ययेन यदि भावना प्राधान्येन प्रतिपाद्येत तदा तदाकाङ्क्षावशात् पुरुषविशेषणानामपि सतां स्वर्गाऽऽदीनां साध्यत्वेन सम्बन्धस्सिध्यति। ततश्च "यागेन भावयेत् स्वर्गम्" इत्येषोऽर्थः शब्दनिर्मितः स्यात्, अन्यथा स्वर्गकामस्य यागे नियोगमात्रं वाक्याऽर्थः स्यादिति। अतो भावनापदाऽर्थस्य सांशयिकत्वात् सप्रयोजनत्वाच्च भावनाया विवेकाय इदं भावनाविवेकग्रन्थाऽऽरम्भस्य आवश्यकत्वमस्ति।

---

[3] द्र०- भावनाविवेकस्य प्रथमश्लोकस्य अवतरणिकायां विषमग्रन्थिभेदिकाव्याख्याग्रन्थाऽनुसारेण, पृ० २।

ततश्च प्रकृतग्रन्थीयप्रतिज्ञावाक्यस्याऽयं निर्गलितोऽर्थ: सम्पद्यते- योऽयं धात्वर्थेन संयोगविभागाऽऽदिगुणैर्भावनाया: संसर्ग: = सम्वलितत्वम्, अर्थाद् धात्वर्थाऽनुरक्ततया भावनाया: प्रतीयमानत्वम्, तेन संसर्गेण (=भावनाया धात्वर्थाऽऽच्छादितेन) मोहिता = भ्रान्ता सन्दिग्धा वा धी: = बुद्धिर्येषान्ते = संसर्गमोहितधिय:। संसर्गमोहितबुद्धियुक्तत्वादेव धातुगोचराद्=धात्वर्थत्वाद् विविक्तम्=धात्वर्थात्पृथग्भूतम्, भावाऽऽत्मानम् = भावनाया: स्वरूपं, ये न पश्यन्ति = जानन्ति, तेभ्य: भावनाविषयकभ्रान्तमतिभ्यो जिज्ञासुभ्य:, स: = सन्दिग्धो भ्रान्तो वा भावनापदाऽर्थ: प्रकृतग्रन्थकारेण विविच्यते = व्याख्यायते। अर्थाद् भावनाविषये भ्रान्तानां-सन्दिग्धानां वा जिज्ञासूनां भावनापदाऽर्थनिश्चयाऽर्थे धात्वर्थविविक्तं भावनापदाऽर्थ: प्रतिपाद्यते।। इति भूमिका।।[4]

## अथ भावनाविवेकग्रन्थप्रतिपाद्यस्य भावनापदाऽर्थस्य मुख्यस्य प्रदर्शनम् –

प्रकृतभावनाविवेकग्रन्थे आचार्यमण्डनमिश्रपादेन धत्वर्थविचार आख्याताऽर्थविचारश्च विस्तृतरूपेण प्रदर्शितम्। तत्र ग्रन्थेऽन्ततो निर्णीतं यद् पच्यादीनां सकर्मकधातूनां विक्लित्यादिरूपं फलमेव धात्वर्थ:, तादृशफलाऽनुकूलफुत्कारऽऽदिव्यापारसहितो यत्नश्च धातूत्तरविहितविहितस्य लकारस्थानिकाऽऽख्यातप्रत्ययस्य प्रतिपादितोऽर्थ:। किन्तु फलमात्रस्य धात्वर्थत्वे "गमनजन्यसंयोगाऽऽश्रयो ग्राम:" इतिप्रयोगाऽनापत्ति: स्यात्। संयोगाऽऽख्यस्य फलस्य गमनरूपत्वेन फलजन्यत्वाऽभावात्। भावे धात्वर्थे ल्युडन्तस्य गमनशब्दस्य संयोगरूपफलाऽर्थत्वात् संयोगजन्यसंयोगाऽऽश्रयो ग्राम इत्येव तद्वाक्याऽर्थत्वात् संयोगजन्यत्वस्य संयोगेऽभावाद् बाधिताऽर्थकत्वात्। "गमनाऽऽश्रयो ग्राम:" इति प्रयोगप्रसगङ्गाच्च। संयोगरूपगमनाऽऽश्रयत्वस्य ग्रामेऽबाधितत्वात्। न च ल्युडन्तस्य संयोगाऽनुकूलव्यापारोऽर्थ:, संयोगस्य संयोगाऽनुकूलव्यापारजन्यत्वाद् "गमनजन्यसंयोगाऽऽश्रयो ग्राम:" इति प्रयोगस्योपपत्ति:। तादृशव्यापाराऽनाश्रयत्वाद् ग्रामस्य "ग्रामो गमनवान्" इति प्रयोगस्य च नाऽऽपत्तिरिति वाच्यम्। ल्युटो व्यापारवाचित्वेन धातो: संयोगाऽर्थकत्वेन संयोगाऽनुकूलव्यापारस्य ल्युडन्तवाच्यत्वमित्याशयेन भवता आपत्त्यनापत्ती परिह्रियेते।

---

[4] द्र०- भावनाविवेकीयप्रथमश्लोकीयव्याख्याने प्रदर्शितायां विषमग्रन्थिभेदिकायां टीकायामुट्टङ्कितविचारमाश्रित्याऽयं लेख:, पृ० ०२ - ०३

एवमपि "गमनवान् ग्राम:" इति प्रयोगस्याऽऽपत्ति:। गम्यर्थ संयोगाऽऽश्रयत्वस्य ग्रामेऽबाधादिति भाव:।

फलमात्रस्य धात्वर्थत्वे दोषाऽन्तरमप्याह- यजधातो: स्वत्वध्वंसाऽनुकूलव्यापारवाचकस्य स्वत्वध्वंसरूपफलमात्राऽर्थकत्वे स्थानिन: त्यज्यमानहविर्निष्ठस्वत्वध्वंसादेव स्वर्गरूपफलसिद्धेरुपपत्तावपूर्वकल्पनाऽनुपपत्ते श्चेति भाव:। अतो धातो: फलमात्रवाचकत्वमिति मण्डनमिश्रमतमयुक्तमित्यर्थ:, इति पूर्वपक्षिणा वैयाकरणेन साधित:। तत्समाधानमत्र ग्रन्थे सम्यग्रूपेण कृतमस्ति।

किन्त्वत्र पूर्वपक्षीयग्रन्थे "घटं करोति" इह कृञ्धातो: क्रियासामान्य वाचकत्वं न सम्भवति, यतो धातो: क्रियासामान्यत्वे "घटम्" इति कर्माऽन्वयाऽभावप्रसङ्गात्। यस्मात् क्रियासामान्यं हि न किञ्चित् साध्यमपेक्षते, क्रियाविशेषमेव तावत् साध्यमपेक्षते। न च घटो धात्वर्थविशेषो येन क्रियासामान्येन कृधातुप्रतिपाद्येन अन्वयं भजेत। अत "घटं करोति" इत्यत्र करोतेर्धात्वर्थ-सामान्याऽतिरिक्त-भावनावाचकत्वात्-पचत्यादि-सामानाऽधिकरण्यस्याऽपि तस्य भावनावाचकत्वं सिद्ध्यति। अर्थाऽन्तरपरत्वे अनेकाऽर्थत्वप्रसङ्गेन प्रतीताऽर्थबाधाऽप्रतीताऽर्थकल्पनाऽऽपत्ते:। यद्यप्याख्यातप्रत्ययस्यैकरूपतया भावनाविशेषबोधनेऽसमर्थत्वं जायते, तथाऽपि पदवत् स्वातन्त्र्येण प्रयोगाऽनर्हस्य प्रत्ययस्य प्रकृत्यानन्तर्यनियमात् प्रकृत्यर्थाऽपेक्षया स्वाऽर्थमभिदधद्विशेषमेवाऽभिधत्ते।

भावनाविशेषप्रतिपत्तावपि सामान्यस्यैवाऽभिधेयत्वम्। अत: "कथं करोति सामानाऽधिकरण्यम्, उभयोस्सामान्यवाचिनोस्तददर्शनात् करहस्ताऽऽदिशब्दवत्" इति न दूषणाऽवसर:। न हि प्रत्ययेन सामान्यमात्रं प्रतीयते, किन्तु विशेषाऽवच्छिन्नं सामान्यम्, तादृशानाञ्च सामानाऽधिकरण्यं (विभक्त्यन्तसामान्यप्रयोग:) दृष्टम् – "को राजा याति? पाञ्चालराज:।" इत्यादौ तस्मात् सामानाऽधिकरण्यमुपपद्यते- इति न सिद्धसाधनाऽऽदि दोष:।

यदुक्तम् – "किं करोति घण्टा ? ध्वनयति"- "का क्रिया? पाक:" इत्युभयत्राऽपि भाव्याऽ (=साध्याऽ) भावेन तदविनाभूतभावनाया अभावेऽपि करोते: प्रयोगदर्शनाद् न भावना करोत्यर्थ: - इति, तत्र वदाम: - अत्राऽप्यस्त्येव भावना, ध्वननेन दु:खाऽऽदिजननात्। यदि तु तन्न विवक्षितम्- इत्युच्यते, तदाऽपि धात्वर्थ एव

तत्र भाव्यः-इति तत्साध्यिका भावना प्रतीयत एव। न हि धात्वर्थः सर्वत्रभावनाकरणमिति नियमः, "अग्निहोत्रं जुहोति" इत्यादौ कर्मत्वस्याऽपि दर्शनात्। ततश्च यत्र भावनासाध्यं फलाऽन्तरं प्रतीयते, तत्र धात्वर्थः करणम्। यत्र तु भावना साध्यं फलाऽन्तरं न प्रतीयते, तत्र धात्वर्थस्यैव भाव्यत्वमिति। तथा "पाकः" इत्यत्राऽप्यस्त्येव पाकभाव्यिका भावना। तद्वाचकाऽऽख्यातपदाऽभावात्तु पाकेन सा लक्ष्यते – इति परं विशेषः। तस्मादसिद्धो भाव्याऽभावे प्रयोगः।

यच्च तिङन्तेऽपि घञन्त इव धातुलक्ष्यैव भावना, नाऽऽख्यातप्रत्ययवाच्या इति; तदपि न, यतः "पाकः"-"पचति" इत्यनयोर्विलक्षणप्रतीतिजनकत्वम्, एकत्र सिद्धरूपो धात्वर्थः प्रतीयते, अपरत्र साध्यरूप इति। तत्र नियामकम् – तिङन्ते भावनाया वाच्यायाः प्रतीतिरेव – इति न तौल्यमापादनीयम्।

अपि च "पचति" इत्यत्र "पाकं करोति" इति शब्दभेदेन विवरणं दृश्यते, "पाकः" इत्यस्य तु न दृश्यते, तस्मादस्ति धात्वर्थाऽतिरिक्ता भावना।। यदपि – भावनायाः साध्यत्वं न भावनाऽन्तरसम्बन्धाऽधीनम् अनवस्थापातात्, किन्तु स्वरूपत एव- इति वक्तव्यं भावनावादिना। तथा च धात्वर्थ एव स्वरूपतः साध्यतया भासते-इत्यस्तु, किं भावनासम्बन्धकल्पनया? निदर्शनन्तु कल्पित भेदेनाऽप्युपपन्नमिति; तदपि न, यतो धात्वर्थस्य स्वतो न साध्यत्वरूपत्वम्, पाकाऽऽदावदर्शनात् साधनाऽन्वयात् पाकादावपि साध्यरूपत्वमस्तीति तु न मन्तव्यम्, "शङ्कुलया खण्डः" इत्यादाविव आक्षिप्तभावनायामेव साधनाऽन्वयात्। अनिश्चिते धात्वर्थस्य साध्यरूपत्वे शब्दोपाधिकभेदकल्पनाऽपि न युक्ता। तस्मादस्ति भावना।

इत्यादि रूपाभिः सैद्धाऽन्तिकविचारगर्भिताभिर्विंशतिकारिकाभिर्ग्रन्थकारेण प्रकृतग्रन्थे आख्यातप्रत्ययवाच्यत्वेन रूपेण भावनापदाऽर्थः प्रत्युपस्थापितः। अस्याः भावनायाश्च वैयाकरणाऽभिमतं धातुवाच्यत्वं निराकृत्य, अवहेल्य च धातुवाचकत्वपोषिकां युक्तिं प्रकृतग्रन्थे ग्रन्थकारेण भावनायाः फलाऽर्थकत्वे स्वतन्त्र स्वरूपसत्त्वे तिङ्वाच्यत्वे च सदृष्टाऽन्तं प्रमाणं महता प्रयत्नेन सद्विचारेण चोपपादि तमिति सर्वथा सुसङ्गच्छते।।[5]

---

[5] भावनाविवेकविषमग्रन्थिभेदिका ग्रन्थस्य क० अ० रामकृष्णशास्त्रि वि० ए० रमाशास्त्रिभ्यां सम्पादितां ग्रन्थीयभूमिकामाश्रित्य विचारोऽयं प्रवर्तितः, पृ० ०१ आरभ्य पृ० २० पर्यन्तविचारः सिंहाऽवलोकनन्यायेन स्थालीपुलाकन्यायेन वा प्रदर्शितः।

## निष्कर्षः -

यद्यप्यस्य भावनाऽपरपर्यायस्य प्रयत्नाऽभिधेयस्य धात्वर्थत्वेन समर्थकेषु ग्रन्थेषु श्रीभट्टोजिदीक्षितविरचितो भाष्यसिद्धाऽन्ताऽऽश्रितः शब्दकौस्तुभो ग्रन्थः प्रतिभाति तदनु च श्रीकौण्डभट्टविरचितो बृह्दवैयाकरणभूषणसारः, भूषणसारः, वैयाकरणबृहद्मञ्जूषा, वैयाकरणलघुमञ्जूषा, वैयाकरणपरमलघुमञ्जूषा भृति ग्रन्थो विराजते, तत्रत्याश्च युक्तयो कैरपि दार्शनिकप्रतिभट्टैर्न भेन्तुं योग्यास्तथाऽपि मीमांसासिन्धुपारङ्गतानां व्याकरणशास्त्रोपदेष्टॄणां वेदाऽन्ताऽऽदिसकल शास्त्रीयतत्त्वाऽर्थसाक्षात्कर्तॄणां वैयाकरणाऽऽदिप्रतिपक्षीय विचारप्रतिक्षेपाय सर्वथा समर्था एवेति न्यायव्याकरणाऽऽदिशास्त्रीयविचारधारां धातुवाच्यत्वरूपां, प्रथमाऽन्ताऽर्थमुख्यविशेषत्वपक्षसमर्थिकां युक्तिञ्च निरस्य भावनामुख्यविशेष्यकत्वपक्षं तस्याश्चाऽऽख्यातप्रतिपाद्यत्वपक्षं सहस्रफणिप्रोक्तं व्याकरणमहाभाष्यमिवाऽतिदुरुहग्रन्थनिर्माणन्तैराचार्यचरणै कृतमिति सर्वथा प्रशंसाऽर्हेयं कृतिरिति शम्।।

## सन्दर्भग्रन्थसूची -


- तर्कालंकारः, जगदीशः। (1973)। शब्दशक्तिप्रकाशिका। वाराणसी: चौखम्भा-संस्कृत-सीरीजः।
- ताताचार्यः, रामानुजः नवलपक्कमः। (2005)। शाब्दबोधमीमांसा। नवदेहली: राष्ट्रियसंस्कृतसंस्थानम्, पांडिचेरी: इंस्टिट्यूट-फ्रांसेस-डे-पांडिचेरी।
- दीक्षितः, भट्टोजिः। (1991)। शब्दकौस्तुभः। वाराणसी: चौखम्भासंस्कृतसीरीजः।
- दीक्षितः, भट्टोजिः। (2011)। शब्दकौस्तुभः। तिरुपतिः-आन्ध्रप्रदेश: राष्ट्रियसंस्कृतविद्यापीठम्।
- दीक्षितः, भट्टोजिः। (2022)। वैयाकरणसिद्धान्तकौमुदी। वाराणसी: चौखम्भासुरभारतीप्रकाशनम्।
- देवः, खण्डः। (2015)। भाट्टतन्त्ररहस्यम्। पांडिचेरी: इंस्टिट्यूट-फ्रांसेस-डे-पांडिचेरी।
- पञ्चोलीः, बालकृष्णः। (2011)। प्रभा टीका (भूषणसारः)। वाराणसी: चौखम्भासंस्कृतसंस्थानम्।
- पतञ्जलिः। (1973)। महाभाष्यम्। पांडिचेरी: इंस्टिट्यूट-फ्रांसेस-डे-इंडोलॉजी।
- पतञ्जलिः। (2001)। व्याकरणमहाभाष्यम्। देहली: प्रतिभाप्रकाशनम्।
- भट्टः, कौण्डः। (2013)। वैयाकरणभूषणसारः। देहली: न्यू-भारतीय-बुक-कार्पोरेशनः।
- भट्टः, गदाधरः। (2011)। व्युत्पत्तिवादः। नवदेहली: राष्ट्रियसंस्कृतसंस्थानम्।

- भट्टः, नागेशः। (1961)। परमलघुमञ्जूषा। बड़ौदा: महाराजसयाजिराववि‍श्वविद्यालयः।
- भट्टः, नागेशः। (2021)। वैयाकरणसिद्धान्तलघुमञ्जूषा। तिरुपतिः-आन्ध्रप्रदेशः राष्ट्रियसंस्कृतविश्वविद्यालयः।
- मिश्रः, मण्डनः। (1922)। भावनाविवेकः। वाराणसी: गवर्नमेण्टसंस्कृत-लाईब्रेरी।
- सायणः। (2009)। माधवीया धातुवृत्तिः। सोनीपत-हरियाणा: रामलालकपूरट्रस्टः।


******